अङ्क-२५
जनवरी-जून २०१५

**वेदविद्या**
ISSN-2230-8962

# वेदाङ्गानां वेदानुशीलने प्रयोजनीयता

**डॉ. विष्णुकुमारनिर्मलः**

विश्वस्य प्राचीनतमो ग्रन्थो वेद एवास्ति। मन्त्रद्रष्टारश्च ऋषयो यैः वेदानां साक्षात्कारः कृतः। ते अस्मिन् एव भारतदेशे अभूवन् । इति तु अस्माकं भारतीयानां कृते विशेषगौरवास्पदो विषयः अस्ति। प्राचीनकाले सर्वे जनाः भारतदेशमागत्य शिक्षां दीक्षां च लेभिरे। येनास्माकं भारतदेशः विश्वगुरुः इति कथ्यते स्म। यथोक्तम् -

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥**[1]

वस्तुतः अस्माकं देशस्य अमूल्यतमनिधिः वेद एव। ततः परं ते वेदा यस्यां भाषायां विद्यन्ते सा संस्कृतभाषा अपि या देववाणी कथ्यते, सर्वासां भाषाणां जननी अस्ति। एतादृशीम् अमूल्यसम्पदां दृष्ट्वा वैदेशिका अपि आकृष्टाः जाताः भारतं प्रति। यथैवोक्तं एकेन विदेशिसंस्कृतप्रेमिविदुषा -

**न जाने विद्यते किं तत्माधुर्यमत्र संस्कृते ।**
**सर्वदैव समुन्मत्ता येन वैदेशिका वयम् ॥** इति।

त्रिकालाबाधितसत्यप्रतिपादकाः भुक्तिमुक्तिसम्पादकाः आस्तिकदर्शनानां ज्ञापकाः, किं बहुना नास्तिकदर्शनानामपि मापकाः न केवलमेतावतापितु बौद्धादयः साम्प्रदायिकाः ये नास्तिकाः कथ्यन्ते तत्रापि वैदिकाचारपद्धत्याः माध्यमेन वेदाः स्वमहिमानं प्रतिष्ठापयन्ति। एतादृशं वेदतत्त्वं निश्चयेन सर्वश्रेष्ठं सर्वोत्तमं च धनं मन्तव्यमस्माभिः सर्वैरपि। वेदस्य एतादृशं महिमानं अप्रतिमविशेषताश्च दृष्ट्वा एव स्वभोगविलासैश्वर्यादिचाकचक्येन मदान्धाः वैदेशिकाः अपि मुग्धाः जाताः।

संसारेऽस्मिन् एकाऽपि जातिः, एकोऽपि देशः, एतादृशो न भविष्यति यः स्वोन्नतिकाले वेदस्पर्शात् वञ्चितः स्यात्। प्राच्य-पाश्चात्यदेशेषु यत्र कुत्रापि मानवः विकासं चकार तत्र तेन स्वपक्षे विपक्षे वा वेदं प्रति स्वमतमवश्यमेवोपस्थापितम्। अद्यत्वे यः कोऽपि प्रकामं वेदस्य कल्पनां, जल्पनाम्, आलोचनां, समालोचनां, प्रत्यालोचनां वा कुर्यात् तत्सर्वं पिष्टपेषणं मात्रमेवास्ति।

यः स्वतः प्रमाणमस्ति यस्य सिद्धये अन्यस्य कस्यापि प्रमाणस्य आवश्यकता नैव भवति सः वेद एव । महर्षिआपस्तम्बेन कथितं ब्राह्मणग्रन्थाः तथा वेदाः द्वयं वेदः अस्ति; उक्तं यथा -

---

[1] मनुस्मृतिः - एतद्देश. अ. २, श्लोक २०।

**'मन्त्रब्राह्मणयोर्वेदनामधेयम्'**[२]। अत्र मन्त्रास्तावत् ज्ञानकारकाः ब्राह्मणास्तु कर्मप्रवृत्तिपरका सन्ति। मन्त्रस्य अर्थज्ञानं विना कर्मज्ञानं न भवितुमर्हति। अतः मन्त्राणां सम्यग् अवबोधनाय विभिन्नानि शास्त्राणि निर्मितानि सन्ति। येषां सहाय्येन विना वेदस्य सम्यग् ज्ञानं न कुर्त्तुं शक्यते। तेषां नामानि इत्थं सन्ति- शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दः ज्योतिषश्चेति। इमानि वेदरूपशरीरस्य षडङ्गानि कथ्यन्ते। यथा अङ्गैः विना शरीरेण किमपि कार्यं कर्त्तुं न शक्यते तथैव वेदाङ्गैः विना वेदस्य सम्यग् अनुशीलनम्, ज्ञानम्; कर्मेत्यादिवेदप्रतिपादितयज्ञयागादिक्रियाकलापाः न भवितुं शक्नुवन्ति अतः वेदस्य अनुशीलने षडङ्गानां महत्त्वं क्रमशः एकैकं शास्त्रं स्वीकृत्य सुस्थाप्यते।

**शिक्षा**

वेदाङ्गेषु शिक्षावेदाङ्गस्य मुख्यस्थानं विद्यते। शिक्षायाः अर्थोऽस्ति वर्णोच्चारणस्य सम्यग् ज्ञानकरणम्। ऋग्वेदभाष्यभूमिकायाम् आचार्यसायणेनापि कथितं यत् स्वरवर्णाद्युच्चारणस्य उपदेशः यत्र क्रियते सा शिक्षा; यथोक्तम् - **स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते उपदिश्यते सा शिक्षा।**[३]

शिक्षा वेदस्य नासिका कथ्यते। यथोक्तं - **शिक्षा घ्राणं तु वेदस्य।**[४] वस्तुतः शिक्षा एकं ध्वनिविज्ञानमस्ति यस्यान्तर्गतं वर्णानां स्वराणां मात्राणां तथा च तेषाम् उच्चारणस्थानानामुच्चारण-भेदानां विवेचनं कृतं वर्तते, यज्ञादिषु अर्थावबोधनार्थं शुद्धोच्चारणार्थं च विशेषरूपेण कथितमस्ति। यतोहि अशुद्धोच्चारणेन यज्ञः यजमानश्च उभावपि नष्टौ भवत इति याज्ञिकानां द्रढीयान् प्रत्ययः। यथोक्तं पाणिनीयशिक्षायाम् -

**मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।**
**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥**[५]

अर्थात् 'इन्द्रशत्रु' पदोच्चारणे स्वरदोषात् अर्थभेदेन वृत्रासुरस्य विनाशः जातः। यथा पूर्वमेवास्माभिः कथितं यत् वर्णाः, स्वराः मात्राः बलम्, साम् सन्तानश्चैते शिक्षायाः मुख्यविषयाः सन्ति। एतेषां भावः तैत्तिरीयोपनिषदि इत्थं प्रतिपादितः - वर्णाः, नाम वैदिकवर्णमाला, स्वरो नाम उदात्तः अनुदात्तः स्वरितः, मात्रा नाम ह्रस्वः दीर्घः प्लुतः। बलं नाम उच्चारणस्थानं प्रयत्नश्च, साअम इत्यस्याभिप्रायोऽस्ति यत् अतिद्रुतादिदोषराहित्येन माधुर्यादिगुणयुक्तेन पूर्वापरवर्णसामञ्जस्येन पूर्णोच्चारणम्। सन्तानशब्दस्य अभिप्रायः मन्त्रपाठसमये पदान्तवर्णानां पदादिवर्णानां संहितया चास्ति।

---

[२] आपस्तम्बः - मन्त्रब्राह्मणयोः.........
[३] सायणभाष्यम् - स्वरवर्णा
[४] पाणिनीयशिक्षा श्लोक ४२
[५] पाणिनीयशिक्षा ५२

अत एव वेदस्य सम्यङ्मन्त्रपाठे वर्णोच्चारणस्य शिक्षाप्रदानं शिक्षायाः उद्देश्यं भवति। कस्य वर्णस्य उच्चारणं कथं करणीयम् ? कः प्रयत्नः विधेयो भवति ? वर्णानां विभाजनं कथं भवति ? कति स्थानानि सन्ति ? मन्त्रपाठकाले शरीरस्य वायुः वर्णरूपेण कथं परिवर्तते ? कस्य स्वरस्य वर्णस्य वा उच्चारणं कथं भवतीत्यादिविषयाः शिक्षा नामके वेदाङ्गे सम्यक् प्रतिपादिताः भवन्ति। यैर्विना वयं वेदस्य सम्यक्तया उच्चारणं कर्त्तुं न शक्नुमः अर्थज्ञानमपि न कर्त्तुं शक्यते। अतः वेदस्यानुशीलने वेदमन्त्रोच्चारणे च शिक्षायाः महन्महत्त्वं जायते।

**व्याकरणम्**

पाणिनीयशिक्षायां कथितम् अस्ति यत् **'मुखं व्याकरणं स्मृतम्'** अर्थात् व्याकरणं वेदस्य मुखमस्ति। व्याक्रियन्ते व्युत्पाद्यन्ते विविच्यन्ते शब्दा अनेनेति व्याकरणम्। व्याकरणं तावत् द्विधा मन्यते। लौकिकसंस्कृतव्याकरणं द्वितीयं तु वैदिकव्याकरणम्। लौकिकसंस्कृतव्याकरणे तावत् पाणिनेः अष्टाध्यायी मुख्यो ग्रन्थः अस्ति। वैदिकव्याकरणे प्रातिशाख्यग्रन्थानाम् अन्तर्भावोऽस्ति।

व्याकरणशास्त्रमन्तरा शब्दानां च अवबोधः नैव भवितुं शक्नोति। अतः येन शास्त्रेण शब्दानां प्रकृतिप्रत्ययानां वर्णनं जायते तद् व्याकरणशास्त्रमिति कथ्यते। शब्दस्य प्रकृतिप्रत्ययानुसारेण अर्थस्य निश्चयः क्रियते।

वेदानुशीलने व्याकरणशास्त्रस्यापि महन्महत्त्वं सञ्जायते । पाणिनीयशिक्षायां व्याकरणं वेदरूपिपुरुषस्य मुखं कथितम्। शरीरे यथा मुखं सौन्दर्यभावाभिव्यक्तिगौरवादिकस्य प्रतीकं विद्यते तथैव व्याकरणशास्त्रं वेदार्थज्ञानस्य साधनं वर्तते। येन पदानां पदार्थानां वाक्यादीनां च विस्तृतं विवेचनं जायते।

वस्तुतः वेदवाङ्मये व्याकरणशास्त्रस्य पारिभाषिकशब्दानां सङ्केताः बाहुल्येन प्राप्यन्ते यथा छान्दोग्योपनिषदि अक्षरविषयकम्[६] ईकार-उकार-एकार[७] विषयकाः सङ्केताः प्राप्यन्ते। एवम् उष्मवर्ण-स्पर्शवर्णानाञ्च[८] सङ्केताः अपि सन्ति। एवमेव तैत्तिरीयसंहितायामपि विभिन्नव्याकरणविषयकाः सङ्केताः प्राप्यन्ते। पाणिनीयशिक्षायां तु व्याकरणं वेदस्य मुखं कथितं वर्तते। अतः अपि षडङ्गेषु व्याकरणस्य कृते बलं दीयते। यथा मुखेन विना भोजनादिव्यवहारः न भवितुं शक्नोति एवं च शरीरस्य पोषणं न भवितुमर्हति तथैव व्याकरणरूपिमुखं विना वेदस्य रक्षा स्थितिश्च न सम्भवा। अतः वेदानुशीलने व्याकरणस्य महत्त्वं राराजते।

---

[६] हिङ्कार इति त्र्यक्षरं प्रस्ताव इति त्र्यक्षरं तत्समम् ।१। आदिरिति द्व्यक्षरम् । (छान्दोग्य. २/१०)

[७] अग्निरीकार आदित्य उकारो निहव एकारः। (छान्दोग्य. १/१३)

[८] सर्वे स्वराः इन्द्रस्यात्मानः सर्व ऊष्माणः प्रजापतेरात्मानः सर्वे स्पर्शाः मृत्योरात्मानस्तं यदि स्वरेषूपालभेतेन्द्रं शरणम् । (छान्दोग्य. २/२२-३०)

**छन्दःशास्त्रम् -**

छद् आच्छादने धातोः छन्द इति शब्दस्य व्युत्पत्तिः भवति। यथाह यास्काचार्यः निरुक्ते - **'छन्दांसि छादनात्'**[९] एवं च कात्यायनेनापि छन्दसां लक्षणविषये इत्थं वर्णितं विद्यते यथा - **'यदक्षरपरिमाणं तच्छन्दः'** अर्थात् यत्र वर्णानां मात्राणाम् अथवा अक्षराणां सङ्ख्या निर्धारिता भवति तच्छन्द उच्यते। अपि च छन्दः विचारकस्य भावान् आच्छाद्य एकं विशिष्टं रूपं ददाति येन तच्छन्दः गेयं जायते। छन्दःसु अक्षराणां वर्णानां वा सङ्ख्या पृथक्-पृथक् भवति; अनेनैवाधारेण छन्दसां नामानि अपि भिन्नानि भिन्नानि सन्ति।

वैदिकछन्दसां विवरणं तावत् ऋक्प्रातिशाख्यनामकग्रन्थे शाङ्खायनश्रौतसूत्रे सामवेदीय निदानसूत्रे पिङ्गलप्रणीतछन्दःसूत्रे च प्राप्यते। एतेषु पिङ्गलकृतच्छन्दःशास्त्रं केवलं छन्दोविषये अधिकं प्रसिद्धम् अस्ति। आचार्यपिङ्गलस्य छन्दःसूत्रस्य पूर्वभागे वैदिकच्छन्दसां तथोत्तरभागे लौकिकच्छन्दसां वर्णनं वर्तते। वेदानुशीलने तावत् छन्दसां महदुपयोगो भवति। इमानि मनोभावाभिव्यक्तेः रमणीयं रुचिकरं च साधनं भवति। छन्दांसि गेयानि भवन्ति। तेन श्रोतुः वक्तुश्चोभयोरपि श्रवणे कथने च आनन्दानुभूतिः जायते। वेदाश्च छन्दोबद्धाः सन्ति, अतः वेदाध्ययनाय छन्दोज्ञानं परमावश्यकं भवति। यथोक्तं -

**अविदित्वा ऋषिं छन्दो दैवतं योगमेव च ।**
**योऽध्यापयेद् जपेद् वापि पापीयान् जायते तु सः ॥**[१०]

**निरुक्तम्**

वेदस्य अध्ययने निरुक्तस्य महन्महत्त्वं वर्तते। यतोहि अनेन निरुक्तशास्त्रेण शब्दस्य मूलज्ञानं जायते। निरुक्तशब्दस्य अर्थोऽस्ति निर्वचनं व्युत्पत्तिः च। शब्दस्य उत्पत्तिः विकासः प्रक्रिया इत्येतादृशविषयाः निरुक्तद्वारा ज्ञायन्ते। शब्दे प्रकृतिप्रत्यययोः स्पष्टीकरणं समानार्थकनानार्थकशब्दानां विवेचनं निरुक्तं विना न भवितुमर्हति। निरुक्ते वैदिकमन्त्राणां निर्वचनानि निर्वचनपरकव्याख्या चोपलभ्यते। यास्केन वैदिकमन्त्रेषु आगताः देवतावाचकशब्दाः यथा - अग्नि, वरुण, इन्द्र सविता इत्यादीन् निर्वचनात्मकशब्दान् मत्वा तत्तद्देवतासम्बद्धमन्त्राः चतुर्धा विभज्य अर्थः कृतः। यथा - आध्यात्मिकोऽर्थः, आधिदैविकः अर्थः, आधिभौतिकार्थः, आधियाज्ञिकश्चार्थः इति।

निरुक्ते तावत् पदस्य चतुर्धा विभाजनं कृतमस्ति। तानि च यथा - नाम, आख्यातः उपसर्गः निपातश्च। यथोक्तम् निरुक्ते - **चत्वारि पद जातानि नामाख्यातोपसर्गनिपाताश्च।**[११]

---

[९] निरुक्तम्...
[१०] निरुक्तम्, ७.१२
[११] निरुक्तम्, १.१

**कल्पः**

वेदप्रतिपादितयज्ञादिविधिविधानं कल्पग्रन्थेषु प्रतिपादितमस्ति अतः कल्पशास्त्रस्य वेदाध्ययने महती उपयोगिता अस्ति। अपि च यज्ञसम्बद्धसमस्तविधीनां समर्थनं प्रतिपादनं च यत्र कृतं भवति तत् कल्पशास्त्रं कथ्यते। यथोक्तं - **कल्प्यते इति कल्पः**। अपि च सायणेनोक्तं कल्पव्युत्पत्त्यानुसारं यथा **'कल्प्यते समर्थ्यते यागप्रयोगोऽत्र'**[१२] इति व्युत्पत्तेः।

कल्पसूत्रं तावद् चतुर्धा विभक्तं वर्तते; यथा १. - श्रौतसूत्रम्, २. गृह्यसूत्रम्, ३. धर्मसूत्रम्, ४. शुल्वसूत्रम् ।

**१. श्रौतसूत्रम्** - श्रुतेरिदं श्रौतम् । श्रौतसूत्रेषु वेदवर्णितानां महायज्ञानाम्; यथा सौत्रामणी-अश्वमेध-वाजपेय-राजसूय-दर्श-पौर्णमास-सोमयागादिबृहद्यागानाम् इष्टीनां च विस्तृतं विवरणं विद्यते । यज्ञ-विधीनां साङ्गोपाङ्गविवरणं वर्तते।

**२. गृह्यसूत्रम्** - गृहे भवं गृह्यम्। एतेषु सूत्रेषु गृहस्थक्रियाणां यथा षोडशसंस्काराणां, पञ्चमहायज्ञानां, सप्तपाकयज्ञानां, विस्तृताः विधयः वर्णिताः सन्ति। एवं च गृहनिर्माणम्, गृहप्रवेशः, पशुपालनम्, कृषिकर्म चेत्यादयो विषयाः अपि निरूपिताः सन्ति।

**३. धर्मसूत्रम्** - आचारसम्बद्धाः ग्रन्थाः धर्मसूत्रेषु अन्तर्भवन्ति। एतेषु वर्णाश्रमधर्माः, आचारविचाराः, मान्यताः, सामाजिकजीवनस्य च कर्तव्याऽकर्तव्याः समुपवर्णिताः सन्ति।

**४. शुल्वसूत्रम्** - अत्र वैज्ञानिकरीत्या शुद्धगणितस्य प्रतिपादनं कृतमस्ति। शुल्वसूत्रेषु ज्यामितिशास्त्रसम्बद्धाः नैके प्रमेयाः वर्णिताः सन्ति। इत्थं कल्पसूत्रेण वेदानुशीलने महत्साहाय्यम् जायते।

वेदस्यातिगभीरार्थावबोधार्थम् इमे ग्रन्थाः प्रवृत्ताः सन्ति। वेदाङ्गकथनेनेदं स्पष्टं भवति यत् षडङ्गानां वेदैः सह घनिष्ठसम्बन्धोऽस्ति। यथोक्तं पाणिनीयशिक्षायाम् -

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।**

---

[१२] सायणाचार्यः

**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥**[१३]

अर्थात् वेदरूपीपुरुषस्य अङ्गविभाजने कथितं यत् छन्दः तस्य पादौ स्तः। हस्तौ कल्प उच्यते, ज्योतिषशास्त्रं तस्य नेत्रे स्तः, निरुक्तं तस्य कर्णौ स्तः, शिक्षा तस्य नासिका कथिता, एवञ्च मुखं व्याकरणं कथितं वर्तते। विचारयामश्चेत् यथा अस्माकं शरीरे कस्यचित् एकस्य अङ्गस्य अभावो भवेत् तर्हि अस्माकं जीवनमेव नश्येत्, यथा नेत्रं विना तु किमपि द्रष्टुं न शक्यते, नासिकां विना घ्रातुं न शक्यते, मुखेन विना भोक्तुं वक्तुं च न शक्येत; अतः सर्वेषामपि अङ्गानां निज-निज महन्महत्त्वमस्ति। अतः शिक्षा, निरुक्तम्, कल्पः, व्याकरणम्, ज्योतिषम् एवं च छन्दः इत्येतेषां वेदानुशीलने महती उपयोगिता वर्तते । अतः एवोक्तं - **तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।**[१४]

डॉ. विष्णुकुमारनिर्मलः
ज्योतिषविभागे वरिष्ठव्याख्याता,
राष्ट्रियसंस्कृतसंस्थानम्, वेदव्यासपरिसरः
बलाहरः, त. - देहरा, काङ्गडा, (हिमाचल प्रदेशः)

[१३] पाणिनीयशिक्षा, ४१ - ४२
[१४] पाणिनीयशिक्षा, ४२